# Mahavidya Tara Tattvarahasya Dhyanam

विरुद्धवाक्यार्थशरीरमण्डले
नवाम्बुदाभां गुरुमुन्नतोदरीम् ।
अतीवखर्वां नवयौवनस्थां
अधःस्थशार्दूलककृत्तिमूर्धजाम् ॥ १ ॥

अनैक्यमाहृत्य शवोपरिस्थितां
शवार्धमालीढपरीतमध्यमाम् ।
विशीर्णवर्णां नृशिरःस्रजोद्भवां
त्रयीविवर्तारुणलोचनत्रयाम् ॥ २ ॥

अभेदपिङ्गैकजटाविराजितां
विभूषणाच्छिन्नसितास्थिभीषणाम् ।
महाष्टसिद्धिप्रकराहिभूषणां
अट्टाट्टहासैर्जगतामभीतिदाम् ॥ ३ ॥

जटास्वनन्तः श्रवसोश्च तक्षको
महाहिपद्मो हृदिहारभूषणाम्।
तथैव कर्कोटकृतोपवीतिकां
सुमेखलायामथ देववासुकिः॥ ४॥

सशङ्खपालः किल कङ्कणो मतः
पदेषु पद्मः किल नूपुरश्रियम्।
भुजेषु नागः कुलिकाङ्गदो मतो
भुजोऽर्ध्वमालामहतास्थितिः स्थिता॥ ५॥

सितश्च रक्तो धवलश्च मेचकः
तथैव नागोऽथ सितश्च पाण्डरः।
भुजङ्गमानामिह वर्णजातयो
भवन्ति सर्वे मुनिभिर्ज्वलच्चिताम्॥ ६॥

कपालकर्त्री ग्रथितोग्रमूर्धजां
सनालमिन्दीवरकान्तिमालिनीम्।

विकोषखड्गं सततं च दक्षिणे
स्वपौरुषोत्थैर्दधतीं भुजैः सदा ॥ ७ ॥

पदार्थदंष्ट्राद्वयपञ्चमुद्रया
विराजमानामसितोत्पलस्रजम् ।
विचिन्तयेत्तां च कवित्वकारिणीं
अन्यागतार्थं प्रजपेच्च तारिणीम् ॥ ८ ॥

- एकवीराकल्पे

viruddhavākyārthaśarīramaṇḍale
navāmbudābhāṃ gurumunnatodarīm ǀ
atīvakharvāṃ navayauvanasthāṃ
adhaḥsthaśārdūlakakṛttimūrdhajām ǁ 1 ǁ

anaikyamāhatya śavoparisthitāṃ
śavārdhamālīḍhaparītamadhyamām ǀ
viśīrṇavarṇāṃ nṛśiraḥsrajodbhavāṃ
trayīvivartāruṇalocanatrayām ǁ 2 ǁ

abhedapiṅgaikajaṭāvirājitāṃ
vibhūṣaṇācchinnasitāsthibhīṣaṇām |
mahāṣṭasiddhiprakarāhibhūṣaṇāṃ
aṭṭāṭṭahāsairjagatāmabhītidām || 3 ||

jaṭāsvanantaḥ śravasośva takṣako
mahāhipadmo hṛdihārabhūṣaṇām |
tathaiva karkoṭakṛtopavītikāṃ
sumekhalāyāmatha devavāsukiḥ || 4 ||

saśaṅkhapālaḥ kila kaṅkaṇo mataḥ
padeṣu padmaḥ kila nūpuraśriyam |
bhujeṣu nāgaḥ kulikāṅgado mato
bhujo.ardhvamālāmahatāsthitiḥ sthitā || 5 ||

sitaśca rakto dhavalaśca mecakaḥ
tathaiva nāgo.atha sitaśca pāṇḍaraḥ |
bhujaṅgamānāmiha varṇajātayo
bhavanti sarve munibhirjvalaccitām || 6 ||

kapālakartrī grathitogramūrdhajāṃ
sanālamindīvarakāntimālinīm |

vikoṣakhaḍgaṃ satataṃ ca dakṣiṇe
svapauruṣotthairdadhatīṃ bhujaiḥ sadā || 7 ||

padārthadaṃṣṭrādvayapancamudrayā
virājamānāmasitotpalasrajam |
vicintayettāṃ ca kavitvakāriṇīṃ
anyāgatārthaṃ prajapecca tāriṇīm || 8 ||

- *ekavīrākalpe*

www.kamakotimandali.com